# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – उत्तररामचरितम् (४-७ अङ्काः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ निवारोदनमणडमुष्णमधुरं सद्यः प्रसुतप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते॥

२ य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥

३ भो भो लव महाबाहो किमेभिस्तव सैनिकैः।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु॥

४ अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति॥

**प्रश्नः २** उत्तररामचरितस्य चतुर्थाङ्कस्य कथासारं संस्कृतगिरा समासेनोपवर्णयन्तु।

**प्रश्नः ३** कौशल्या-जनकसंवादं यथाग्रन्थं लिखत।

**प्रश्नः ४** पञ्चमाङ्कस्य कथासारं समासेन लिखन्तु।

**प्रश्नः ५** लव-चन्द्रकेत्वोः संवादं यथाग्रन्थं वर्णयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्तण्ज्योतिरुज्ज्वलः।
पुटभेदो ललाटस्थनीललोहितचक्षुषः॥

२ त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोषस्य गुप्त्यै ।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥

३ क्षुभिताः कामपि दशां कुर्वन्ति मम साम्प्रतम् ।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥

४ मन्थादिव क्षुभ्यति गाङ्गमम्भो व्याप्तं च देवर्षिभिरन्तरिक्षम् ।
आश्चर्यभार्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुदेति ॥

**प्रश्नः ७** षष्ठाङ्कस्य कथां समासेन लिखत ।

**प्रश्नः ८** रामेण कृतां कुमारपरिचितिं यथाग्रन्थं लिखत ।

**प्रश्नः ९** सप्तमाङ्कस्य कथासारं समुपवर्णयत ।

**प्रश्नः १०** प्रधाननायिकायाः सीतायाः चरित्रचित्रणं समासेन स्वसंस्कृतगिरा कुरुत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ उत्तररामचरितस्य रचयिता कः ?
२ चतुर्थाङ्कस्य नाम किम् ?
३ उत्तररामचरिते कति अङ्काः सन्ति ?
४ ‘सर्वमतिमात्रं दोषाय’ इति कः वदति ?
५ रामेण सीतायाः त्यागः कस्यामवस्थायां कृतः ?
६ कुशलवौ कस्य पुत्रौ ?
७ सप्तमाङ्कस्य नाम किम् ?
८ चन्द्रकेतुः कस्य पुत्रः अस्ति ?
९ उत्तररामचरिते कस्य गुणगानं वर्णितमस्ति ?
१० भवभूते स्थितिकालः कः ?
११ जनकस्य पुत्री का ?
१२ पञ्चमाङ्कस्य नाम किम् ?
१३ रामस्य पञ्चवटीप्रवेशे किम् उद्देश्यम् ?
१४ उत्तररामचरिते प्रधानः रसः कोऽस्ति ?
१५ षष्ठाङ्कस्य नाम किम् ?

****